Register Number:

Date: 17-11-20(M)

ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27
B.Sc, B.A, B.COM & BBA - III SEMESTER
SEMESTER EXAMINATION: NOVEMBER 2020
**SA 318 - SANSKRIT**

**Time- 2 1/2 hrs** **Max Marks-70**

**I. समुचितं उत्तरं चिनुत।** **12×1=12**

अ. कामात् कः अभिजायते?

१. संन्तोषः २. आसक्तिः ३. आनन्दः ४. क्रोधः

आ. सम्भावितस्य मरणात् किम् अतिरिच्यते?

१. कीर्तिः २. अकीर्तिः ३. प्रसिद्धिः ४. ख्यातिः

इ. मानवः अनिच्छन् कुत्र नियोजितः?

१. अधर्मे २. लोभे ३. क्रोधे ४. पापकर्मणि

ई. युगे युगे देवस्य सम्भवः किमर्थम्?

१. प्रलयार्थम् २. धर्मसंस्थापनार्थम् ३. सर्जनार्थम् ४. विलीनार्थम्

उ. कतिविधाः यज्ञाः भवन्ति?

१. त्रिविधाः २. पञ्चविधाः ३. चतुर्विधाः ४.षट्विधाः

ऊ. मानवः कस्मात् सिद्धिः न समधिगच्छति?

१. तपः प्रभावत् २. सन्यासात् ३. साधनात् ४. योगात्

ऋ. कर्मसमुद्भवः कस्मात् भवति?

१. लोभात् २. क्रोधात् ३. फलोद्देशेन ४. यज्ञात्

ऋ. अन्नसम्भवः कस्मात् भवति?

१. तपः प्रभावात्　　२. यज्ञात्　　३. कृषिकार्यात्　४. पर्जन्यात्

लृ. कर्माणि कुत्र आधातव्यम्?

१. ब्रह्मणि　　२.फले　　३. ज्ञाने　　४. आत्मनि

ए. चान्द्रमसं ज्योतिः कदा अयनस्य भवति?

१. उत्तरायणे　　२. दक्षिणायने　　३. पश्चिमायने　　४. पूर्वायने

ऐ. सन्यासात् किं न समधिगच्छति?

१. सिद्धिम्　　२. कीर्तिम्　　३. बुद्धिम्　　४. धर्मम्

ओ. नैष्कर्म्यं कः अश्नुते?

१. माधवः　　२. राक्षसः　　३. देवः　　४. पुरुषः

**II.अन्वयम् अन्वयार्थं व्याकरणं तात्पर्यं च लिखत।**　　**3×6=18**

ओ. न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।

न च संन्यसनादेव सिद्धिं समधिगच्छति॥

अं. कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।

अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥

अः. विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।

शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥

क. न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥

**III. सविस्तरं लिखत।**　　**2×10=20**

ख. दशमोध्याये उक्तप्रकारेण विभूतिं सविस्तरं वर्णयत।

ग. सत्त्वरजस्तमो गुणान् यथामतिं वर्णयत।

घ.आधुनिकजीवने भगवद्गीतायाः मार्गदर्शनम् अनिवार्यं वा न वा? सकारणं वर्णयत।

**IV. संस्कृतभाषया अनुवादं कुरुत**　　**10**

ङ. One day Nandini wanted to test the king. She and the king went to the Himalayan mountains. While Dilip, the King was admiring the beauty of the mountains, Nandini entered a cave. Suddenly, a lion from the cave forcibly caught Nandini. Being tormented

by the lion she cried aloud. Hearing this king came into action. He put his hand in the quiver to take the arrow. Unfortunately his hand became paralysed and he couldn't do so. This raged the king with anger but he felt insulted inside as he became helpless.

**V. गद्यांशं पठित्वा समुचितम् उत्तरं लिखत** **5×2=10**

एकस्मिन् विद्यालये नवमकक्षायाः छात्रेषु अकिञ्चनः इति नाम एकः छात्रः आसीत्। कक्षायाः सर्वे छात्राः सम्पन्नपरिवारेभ्यः आसन्, परन्तु अकिञ्चनस्य पिता एकस्मिन् कार्यालये चतुर्थश्रेण्याः कर्मकरः आसीत्। इतरान् सम्पनान् छात्रान् दृष्ट्वा प्रायः अकिञ्चनस्य मनसि हीनभावना प्राविशत्। सः अचिन्तयत् एतेषां सहपाठिनां जीवनं धन्यम् अस्ति। धिक् मम अभावपूर्णं जीवनम्। मम सहपाठिनां जीवनं पर्वतस्य इव उच्चम् मम च जीवनं धूलिवत् निम्नम्। यदा सः एवं चिन्तयति स्म तदैव वैभवः तम् अवदत् भोः मित्र! अहं त्वत्तः गणितं पठितुम् इच्छामि। किं त्वम् अद्य सायङ्काले मम गृहम् अगच्छत् तदा सः अपश्यत् यत् वैभवस्य गृहे मातापितरौ अनुपस्थितौ आस्ताम्। वैभवः तस्मै असूचयत् यत् रात्रौ विलम्बेन एव तौ गृहम् आगच्छतः। वैभवस्य विषादपूर्णं जीवनं दृष्ट्वा अकिञ्चनः अबोधयत् यत् तस्य गृहे मातापित्रोः अधिकसान्निध्येन तस्य एव जीवनं वरम् न तु वैभवस्य। सत्यमेवास्ति – दूरतः पर्वताः रम्याः। इति

च. अकिञ्चनस्य कक्ष्यायाः अन्ये छात्राः कीदृश- परिवारेभ्यः आसन्?

छ. अकिञ्चनस्य मनसि किं प्राविशत्?

ज. अकिञ्चनस्य पिता कः आसीत्?

झ. अकिञ्चनः हीनभावनया किम् अचिन्तयत्?

ञ. 'सम्पन्नात्' इति पदस्य विशेष्यपदं किम् अस्ति?